शिनिः । मेघयोनित्वादेवास्य तथात्वम् ।) धूमः । इति हेमचन्द्रः ॥

जीरः, पुं, ( जवतीति । जु गतौ+"जोरी च ।" उणां २ । २३ । इति रक् ईत्त्वान्तादेशः । ) जीरकः । खड्गः । इति मेदिनी । रे, ३९ ॥ अणुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ( विद्यावति, त्रि । यथा, ऋग्वेदे । १।४४।११ ।
"मनुष्वद्देव धीमहि प्रचेतसं जीरं दूतममर्त्त्यम् ।"
"जीरं विद्यावन्तम् ।" इति दयानन्दभाष्यम् ॥)

जीरकः, पुं, ( जीर+संज्ञायां कन् । ) वणिग्-द्रव्यविशेषः । जीरा इति भाषा । तत्पर्य्यायः । जरणः २ अजाजी ३ कणा ४ । इत्यमरः । २ । ९ । ३६ ॥ जीर्णः ५ जीरः ६ दीप्यः ७ जीरणः ८ अजाजिका ९ वह्निशिखः १० मागधः ११ दीपकः १२ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । दीपनत्वम् । वातगुल्माध्मानातीसारग्रहणीकृमि-नाशित्वञ्च । इति राजनिर्घण्टः ॥ रुचिस्वर-कारित्वम् । गन्धयुक्तत्वम् । कफवातनाशित्वम् । पाके कटुत्वम् । तीक्ष्णत्वम् । लघुत्वम् । पित्त-वर्द्धनत्वञ्च । इति राजवल्लभः ॥ अपि च । शुक्लजीरा कृष्णजीरा कलौञ्जी एषां नामानि गुणाश्च ।

"जीरको जरणोऽजाजी कणा स्याद्दीर्घजीरकः ।
कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ॥
कलाजाजी तु सुषवी कालिका चोपकालिका ।
पृथ्वीका कारवी पृथ्वी पृथुस्तूष्णोपकुञ्चिका ॥
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि ।
जीरकत्रितयं रूक्षं कटुकं दीपनं लघु ॥
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ।
ज्वरघ्नं पाचनं वल्यं वृष्यं रुच्यं कफापहम् ॥
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत् ।"
इति भावप्रकाशः ॥

जीरणः, पुं, (जीरकः पृषोदरादित्वात् कस्य णः ।) जीरकः । इति राजनिर्घण्टः ॥

जीरिका, स्त्री, ( जीर्य्यतीति । जॄ+बाहुलकात् रिक् । ईत्त्वान्तादेशः । ततः स्वार्थे कन् । ) वंशपत्रीतृणम् । इति राजनिर्घण्टः ॥

जीर्णं, क्ली, ( जीर्य्यति स्मेति । जॄ ष वयोहानौ+ गत्यर्थेति क्तः । निष्ठातस्य नत्वम् । ) शैलजम् । इति राजनिर्घण्टः ॥ (वयःप्रकारविशेषः । यथा, "तद्वयो यथा स्थूलभेदेन त्रिविधम् । बालं मध्यं जीर्णमिति ।" इति चरके विमानस्थाने-ऽष्टमेऽध्याये ॥)

जीर्णः, पुं, ( जीर्य्यतेऽनेनेति । जॄ+करणे क्तः । ) जीरकः । इति राजनिर्घण्टः ॥ (वृक्षः । इति हेमचन्द्रः । ४ । १८० ॥ )

जीर्णः, त्रि, ( जीर्य्यतीति । जॄ+"गत्यर्थाकर्म्मक-श्लिषेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः । ) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ पुरा-तनः । इति हेमचन्द्रः ॥ (यथा, देवीभाग-वते । १ । २० । १७ ।
"तथात्र देहं धर्म्मात्मा देही जीर्णमिवाम्बरम् ॥")
गतवस्तुवयः । जराविशिष्टः । पक्वः । पाक-विशिष्टः ॥ * ॥ ( यथा, चाणक्ये । ७९ ।
"जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनाम् ।
रणात् प्रत्यागतं शूरं शस्यञ्च गृहमागतम् ॥")
अथ जीर्णद्रव्याणि ।

"नारीकेलफलेषु तण्डुलमथ क्षीरं रसाले हितं
जम्बीरोत्थरसो घृते समुचितः सर्पिस्तु मोचा-फले ।
गोधूमेषु च कर्कटी हिततमा मांसाशये काञ्जिकं
नारङ्गे गुड़भक्षणञ्च कथितं पिण्डारके कोद्रवः ॥
पिष्टान्ने सलिलं पियालफलजे पथ्या हिता माषजे
खण्डे क्षीरभवे तु तक्रमुचितं कोष्णाम्बु कोलभवे ।
मत्स्ये चूतफलं त्वजीर्णशमनं मध्वम्बुपानात्यये
तैलं पौष्करजे कटुप्रशमनं शैलांस्तु उद्गा जयेत् ॥

पनसे कदलं कदले च घृतं
घृतपाकविधावपि जम्बुरसः ।
तदुपद्रवशान्तिकरं लवणं
लवणेषु च तण्डुलवारि वरम् ॥
नारिकेलफलतालबीजयोः
पाचनं य इह तण्डुलं विदुः ।
ते वदन्ति मुनयोऽथ तण्डुलान्
क्षीरवारि परिपाचयत्यपि ॥
दाड़िमामलकतालतिन्दुकी-
बीजपूरकदलीफलान्यपि ।
वाकुलेन फलेन च पाचयेत्
पाकमेति बकुलं खमूलतः ॥
मधूक-मालूर-शृगादनानां
पक्वस्य खर्ज्जूरकपित्थकानाम् ।
पाकाय पेयं पिचुमर्द्दबीजं
घृतेऽपि तक्रं प्रवदन्ति पथ्यम् ॥
गोधूममाषहरिमन्थसतीनमुद्ग-
पाको भवेदिति च मातुलपत्रकेण ।
खर्ज्जूरिकाविशकशेरुसितासु शस्तं
शृङ्गाटके मधुफलेष्वपि भद्रमुस्तम् ॥
पिशितपनसयोः स्यादाम्रबीजेन पाकः
कृशरमहिषयोर्वितुक्षीरयोः सैन्धवेन ।
चिपिटपरिणतिः स्यात् पिप्पलीदिप्यकाभ्या-
मपहरति तुषाम्भो वैदलानामजीर्णम् ॥
कर्पूरपूगीफलनागवल्ली-
काश्मीरजातीफलजातिकोशम् ।
कस्तूरिका सिक्थकनारिकेल-
जलं पचत्याशु समुद्रफेनः ॥
श्यामाकनीवारकुलत्थयष्टि-
निष्पावकङ्गूदधिमस्तकस्तु ।
चिञ्चाकुलत्थौ तिलतैलयोगात्
जटाम्बुदनादस्य निहन्त्यथान्द्रम् ॥
कशेरुशृङ्गाटमृणालकन्दौ-
खर्ज्जूरखण्डा अपि नागरेण ।
पलाशभल्लाम्बु तथार्द्रको वा
रसो निहन्यादरसमिक्षुजातम् ॥
अन्नेन केनाप्यथ यौगिकेन
कोष्णाम्बुना वा घृतमेति पाकम् ।
तिलादितैलान्यपि काञ्जिकेन
सर्व्वस्य मज्जा पनसामलक्यौ ॥
किमत्र चित्रं बहुमांसमत्स्य-
भोजी सुखी स्यात् परिपीय शुक्तम् ।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यं परिपाकमेति ॥
कपोतपारावतनीलकण्ठ-
कपिञ्जलानां पिशितानि जग्ध्वा ।
काशस्य मूलं परिपेयमुष्णं
सुखीभवेन्ना बहुशो न भूतम् ॥
चोष्टे रसाला सुरभीयवस्तु-
मण्डेन कोष्णेन विपाकमेति ।
शल्कस्य चूर्णेन हयारिनारी-
पयोदधिक्षीरमुपैति पाकम् ॥
वटी वेसवाराक्तवङ्गेन केषी-
शमं पर्पटः शिग्रुबीजेन याति ।
कषाम्लतो लड्डुका पूपकादे-
र्विपाको भवेच्छष्कुलीमण्डयोश्च ॥
श्याविष्टोध्या मण्डकाश्चित्रतैलाद्-
यावत् चारात् कोलकूष्माण्डयोऽपि ।
जीर्य्यन्त्येवं पायसो मुद्गयूषात्
माषमुद्गादप्यारनालं सुखाय ॥
तप्तं तप्तं हेम वा तारमश्मौ
तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।
पीत्वावश्यं दीर्घकालोपपन्न-
मम्भो जीर्णं शीघ्रमेवं जहाति ॥
पालङ्किकाकेमुककारवल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानाम् ।
उपोदकालाबुपटोलकानां
सिद्धार्थको मेवदरस्य पक्ता ॥
शुष्कोसतीनस्य च नागरङ्ग-
जम्बीरयोः कोद्रवको निहन्ता ।
जरामिर। गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं बहुशो न भूतम् ॥
पटोलवंशाङ्कुरकारवल्ली-
फलाम्ललावूनि बहूनि जग्ध्वा ।
क्षारोदकं ब्रह्मतरोर्निपीय
भोक्तुं पुनर्वाञ्छति तावदेव ॥
विपच्यते शूरणको गुड़ेन
तथालुकं तण्डुलतोयपानात् ।
जम्बीरनीरेण निशारणोनं
मुस्तेन तूर्णं परिपाकमेति ॥
वास्तूकमिश्रार्थकवास्तुकानां
गायत्रिसारक्वथितेन पाकः ।
शाकानि सर्व्वाण्युपयान्ति पाकं
क्षारेण सद्यास्तिलनालजेन ॥
आम्रातकोदुम्बरपिप्पलीनां
फलानि च प्लक्षवटादिकानाम् ।
स्युः शामनं पर्य्युषितोदकेन
पियालमज्जा च कदुष्णकेन ॥